# ॥ दुर्गा दकारादिसहस्रनामस्तोत्रम् ॥

.. durgA dakArAdi sahasranAma stotram ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : durgA dakArAdi sahasranAma stotra
File name : durgadakaradisahasranama.itx
Category : sahasranAma
Location : doc_devii
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Kirk Wortman kirkwort at hotmail.com
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Description-comments : kulArNave tantre
Latest update : August 09, 2006
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ दुर्गा दकारादिसहस्रनामस्तोत्रम् ॥

श्रीगणेशाय नमः ।
श्रीदेव्युवाच ।
मम नामसहस्रं च शिवपूर्वविनिर्मितम् ।
तत्पठ्यतां विधानेन तदा सर्वं भविष्यति ॥ १॥

इत्युक्त्वा पार्वती देवी श्रावयामास तच्चतान् ।
तदेव नाम साहस्रं दकारादि वरानने ॥ २॥

रोगदारिद्र्य दौर्भाग्यशोकदुःखविनाशकम् ।
सर्वासां पूजितं नाम श्रीदुर्गादेवता मता ॥

निजबीजं भवेद् बीजं मन्त्रं कीलकमुच्यते ।
सर्वाशापूरणे देवि विनियोगः प्रकीर्त्तितः ॥ ४॥

ॐ अस्य श्रीदकारादिदुर्गासहस्रनामस्तोत्रस्य ,
शिव ऋषिः , अनुष्टुप् छन्दः ,
श्रीदुर्गादेवता ,दुँ बीजं , दुँ कीलकं ,
दुःख-दारिद्र्य-रोग-शोक-निवृत्तिपूर्वकं-
चतुर्वर्गफलप्राप्त्यर्थे पाठे विनियोगः ।
दुँ दुर्गा दुर्गतिहरा दुर्गाचलनिवासिनी ॥ ५॥

दुर्गमार्गप्रविष्टा च दुर्गमार्गप्रवेशिनी ।
दुर्गमार्गकृतावासा दुर्गमार्गजयप्रिया ॥ ६॥

दुर्गमार्गगृहीतार्चा दुर्गमार्गस्थितात्मिका ।
दुर्गमार्गस्तुतिपरा दुर्गमार्गस्मृतिपरा ॥ ७॥

दुर्गमार्गसदास्थालि दुर्गमार्गरतिप्रिया ।
दुर्गमार्गस्थलस्थाना दुर्गमार्गविलासिनी ॥ ८॥

दुर्गमार्गत्यक्तवस्त्रा दुर्गमार्गप्रवर्त्तिनी ।
दुर्गासुरनिहन्त्री च दुगासुरनिषूदिनी ॥ ९॥

दुर्गासुरहरादूती दुर्गासुरविनाशिनी ।
दुर्गासुरवधोन्मत्ता दुर्गासुरवधोत्सुका ॥ १०॥

दुर्गासुरवधोत्साहा दुर्गासुरवधोद्यता ।
दुर्गासुरवधप्रेप्सु दुर्गासुरमखान्तकृत् ॥ ११॥

दुर्गासुरध्वंसतोषा दुर्गदानवदारिणी ।

दुर्गविद्रावणकरी, दुर्गविद्राविणी सदा ॥ १२॥

दुर्गविक्षोभनकरी दुर्गशीर्षनिकृन्तनी ।
दुर्गविध्वंसनकरी दुर्गदैत्यनिकृन्तनी ॥ १३॥

दुर्गदैत्यप्राणहरा दुर्गदैत्यान्तकारिणी ।
दुर्गदैत्यहरत्राता दुर्गदैत्यसृगुन्मदा ॥ १४॥

दुर्गदैत्याशनकरी दुर्गचर्माम्बरावृता ।
दुर्गयुद्धोत्सवकरी दुर्गयुद्धविशारदा ॥ १५॥

दुर्गयुद्धासवरता दुर्गयुद्धविमर्द्दिनी ।
दुर्गयुद्धहास्यरता दुर्गयुद्धाट्टहासिनी ॥ १६॥

दुर्गयुद्धमहामत्ता दुर्गयुद्धानुसारिणी ।
दुर्गयुद्धोत्सवोत्साहा दुर्गदेशनिषेविणी ॥ १७॥

दुर्गदेशवासरता दुर्गदेशविलासिनी ।
दुर्गदेशार्चनरता दुर्गदेशजनप्रिया ॥ १८॥

दुर्गमस्थानसंस्थाना दुर्गमध्यानसाधना ।
दुर्गमा दुर्गमध्याना दुर्गमात्मस्वरूपिणी ॥ १९॥

दुर्गमागमसन्धाना दुर्गमागमसंस्तुता ।
दुर्गमागमदुर्ज्ञेया दुर्गमश्रुतिसम्मता ॥ २०॥

दुर्गमश्रुतिमान्याच दुर्गमश्रुतिपूजिता ।
दुर्गमश्रुतिसुप्रीता दुर्गमश्रुतिहर्षदा ॥ २१॥

दुर्गमश्रुतिसंस्थाना दुर्गमश्रुतिमानिता ।
दुर्गमाचारसन्तुष्टा दुर्गमाचारतोषिता ॥ २२॥

दुर्गमाचारनिर्वृत्ता दुर्गमाचारपूजिता ।
दुर्गमाचारकसिता दुर्गमस्थानदायिनी ॥ २३॥

दुर्गमप्रेमनिरता दुर्गमद्रविणप्रदा ।
दुर्गमाम्बुजमध्यस्था दुर्गमाम्बुजवासिनी ॥ २४॥

दुर्गनाडीमार्गगती दुर्गनाडीप्रचारिणी ।
दुर्गनाडीपद्मरता दुर्गनाड्यम्बुजस्थिता ॥ २५॥

दुर्गनाडीगतायाता दुर्गनाडिकृतास्पदा ।
दुर्गनाडीरतरता दुर्गनाडीशसंस्तुता ॥ २६॥

दुर्गनाडीश्वररता दुर्गनाडीशचुम्बिता ।

दुर्गनाडीशक्रोडस्था दुर्गनाड्युत्थितोत्सुका ॥ २७॥

दुर्गनाड्यारोहणा च दुर्गनाडीनिषेविता ।
दरीस्थाना दरीस्थानवासिनी दनुजान्तकृत् ॥ २८॥

दरीकृततपस्या च दरीकृतहरार्चना ।
दरीजापितदिष्टा च दरीकृतरतिक्रिया ॥ २९॥

दरीकृतहरार्हा च दरीक्रीडितपुत्रिका ।
दरीसन्दर्शनरता दरीरोपितवृश्चिका ॥ ३०॥

दरीगुप्तिकौतुकाढ्या दरीभ्रमणतत्परा ।
दनुजान्तकरी दीना दनुजसन्तानदारिणी ॥ ३१॥

दनुजध्वंसिनी दूना दनुजेन्द्रविनाशिनी ।
दानवध्वंसिनीदेवी दानवानां भयङ्करी ॥ ३२॥

दानवी दानवाराध्या दानवेन्द्रवरप्रदा ।
दानवेन्द्रनिहन्त्री दानवद्वेषिणी सती ॥ ३३॥

दानवारिप्रेमरता दानवारिप्रपूजिता ।
दानवारिकृतार्चा च दानवारिविभूतिदा ॥ ३४॥

दानवारिमहानन्दा दानवारिरतिप्रिया ।
दानवारिदानरता दानवारिकृतास्पदा ॥ ३५॥

दानवारिस्तुतिरता दानवारिस्मृतिप्रिया ।
दानवार्याहाररता दानवारिप्रबोधिनी ॥ ३६॥

दानवारिधृतप्रेमा दुःखशोकविमोचिनी ।
दुःखहन्त्री दुःखदात्री दुःखनिर्मूलकारिणी ॥ ३७॥

दुःखनिर्म्मूलनकरी दुःखदारिद्र्यनाशिनी ।
दुःखहरा दुःखनाशा दुःखग्रामा दुरासदा ॥ ३८॥

दुःखहीना दुःखधारा द्रविणाचारदायिनी ।
द्रविणोत्सर्गसन्तुष्टा द्रविणत्यागतोषिका ॥ ३९॥

द्रविणस्पर्शसन्तुष्टा द्रविणस्पर्शमानदा ।
द्रविणस्पर्शहर्षाढ्या द्रविणस्पर्शतुष्टिदा ॥ ४०॥

द्रविणस्पर्शनकरी द्रविणस्पर्शनातुरा ।
द्रविणस्पर्शनोत्साहा द्रविणस्पर्शसाधिता ॥ ४१॥

द्रविणस्पर्शनमता द्रविणस्पर्शपुत्रिका ।

द्रविणस्पर्शरक्षिणी द्रविणस्तोमदायिनी ॥ ४२॥

द्रविणाकर्षणकरी द्रविणौघविसर्जनी ।
द्रविणचलदानाढ्या द्रविणाचलवासिनी ॥ ४३॥

दीनमाता दीनबन्धु दीनविघ्नविनाशिनी ।
दीनसेव्या दीनसिद्धा दीनसाध्या दिगम्बरी ॥ ४४॥

दीनगेहकृतानन्दा दीनगेहविलासिनी ।
दीनभावप्रेमरता दीनभावविनोदिनी ॥ ४५॥

दीनमानवचेतःस्था दीनमानवहर्षदा ।
दीनदैन्यनिघातेच्छु दीनद्रविणदायिनी ॥ ४६॥

दीनसाधनसन्तुष्टा दीनदर्शनदायिनी ।
दीनपुत्रादिदात्रि च दीनसम्पद्विधायिनी ॥ ४७॥

दत्तात्रेयध्यानरता दत्तात्रेयप्रपूजिता ।
दत्तात्रेयर्षिसंसिद्धा दत्तात्रेयविभाविता ॥ ४८॥

दत्तात्रेयकृतार्हा च दत्तात्रेयप्रसाधिता ।
दत्तात्रेयहर्षदात्री दत्तात्रेयसुखप्रदा ॥ ४९॥

दत्तात्रेयस्तुता चैव दत्तात्रेयनुतासदा ।
दत्तात्रेयप्रेमरता दत्तात्रेयानुमानिता ॥ ५०॥

दत्तात्रेयसमुद्गीता दत्तात्रेयकुटुम्बिनी ।
दत्तात्रेयप्राणतुल्या दत्तात्रेयशरीरिणी ॥ ५१॥

दत्तात्रेयकृतानन्दा दत्तात्रेयांशसम्भवा ।
दत्तात्रेयविभूतिस्था दत्तात्रेयनुसारिणी ॥ ५२॥

दत्तात्रेयगीतिरता दत्तात्रेयधनप्रदा ।
दत्तात्रेयदुःखहरा दत्तात्रेयवरप्रदा ॥ ५३॥

दत्तात्रेयज्ञानदात्री दत्तात्रेयभयापहा ।
देवकन्या देवमान्या देवदुःखविनाशिनी ॥ ५४॥

देवसिद्धा देवपूज्या देवेज्या देववन्दिता ।
देवमान्या देवधन्या देवविघ्नविनाशिनी ॥ ५५॥

देवरम्या देवरता देवकौतुकतत्परा ।
देवक्रीडा देवव्रीडा देववैरिविनाशिनी ॥ ५६॥

देवकामा देवरामा देवद्विष्टविनाशिनी ।

देवदेवप्रिया देवी देवदानववन्दिता ॥ ५७॥

देवदेवरतानन्दा देवदेववरोत्सुका ।
देवदेवप्रेमरता देवदेवप्रियंवदा ॥ ५८॥

देवदेवप्राणतुल्या देवदेवनितम्बिनी ।
देवदेवहृतमना देवदेवसुखावहा ॥ ५९॥

देवदेवक्रोडरता देवदेवसुखप्रदा ।
देवदेवमहानन्दा देवदेवप्रचुम्बिता ॥ ६०॥

देवदेवोपभुक्ताच देवदेवानुसेविता ।
देवदेवगतप्राणा देवदेवगतात्मिका ॥ ६१॥

देवदेवहर्षदात्री देवदेवसुखप्रदा ।
देवदेवमहानन्दा देवदेवविलासिनी ॥ ६२॥

देवदेवधर्मपत्नी देवदेवमनोगता ।
देवदेववधूर्देव देवदेवार्चनप्रिया ॥ ६३॥

देवदेवाङ्गनिलया देवदेवाङ्गशायिनी ।
देवदेवाङ्गसुखिनी देवदेवाङ्गवासिनी ॥ ६४॥

देवदेवाङ्गभूषा च देवदेवाङ्गभूषणा ।
देवदेवप्रियकरी देवदेवाप्रियान्तकृत् ॥ ६५॥

देवदेवप्रियप्राणा देवदेवप्रियात्मिका ।
देवदेवार्चकप्राणा देवदेवार्चकप्रिया ॥ ६६॥

देवदेवार्चकोत्साहा देवदेवार्चकप्रिया ।
देवदेवार्चकाविघ्ना देवदेवप्रसूरपि ॥ ६७॥

देवदेवस्यजननी देवदेवविधायिनी ।
देवदेवस्यरमणी देवदेवहृदाश्रया ॥ ६८॥

देवदेवेष्टदेवा च देवतापसपातिनी ।
देवताभावसन्तुष्टा देवताभावतोषिता ॥ ६९॥

देवताभाववरदा देवताभावसिद्धिदा ।
देवताभावसंसिद्धा देवताभावसम्भवा ॥ ७०॥

देवताभावसुखिनी देवताभाववन्दिता ।
देवताभावसुप्रीता देवताभावहर्षदा ॥ ७१॥

देवताविघ्नहन्त्री च देवताद्विष्टनाशिनी ।

देवतापूजितपदा देवताप्रेमतोषिता ॥ ७२॥

देवतागारनिलया देवतासौख्यदायिनी ।
देवतानिजभावा च देवताहृतमानसा ॥ ७३॥

देवताकृतपादार्चा देवताहृतभक्तिका ।
देवतागर्वमध्यस्था देवतादेवतादनुः ॥ ७४॥

दुँदुर्गायैनमोनाम्नी दुँ फङ्मन्त्रस्वरूपिणी ।
दुँ नमोमन्त्ररूपा च दुँनमोमूर्त्तिकात्मिका ॥ ७५॥

दूरदर्शीप्रिया दुष्टादुष्टभूतनिषेविता ।
दूरदर्शीप्रेमरता दूरदर्शीप्रियंवदा ॥ ७६॥

दूरदर्शीसिद्धिदात्री दूरदर्शीप्रतोषिता ।
दूरदर्शीकण्ठसंस्था दूरदर्शीप्रहर्षिता ॥ ७७॥

दूरदर्शीगृहीतार्चा दूरदर्शीप्रतर्पिता ।
दूरदर्शीप्राणतुल्या दूरदर्शीसुखप्रदा ॥ ७८॥

दूरदर्शीभ्रान्तिहरा दूरदर्शीहृदास्पदा ।
दूरदर्श्यरिविद्भावा दीर्घदर्शिप्रमोदिनी ॥ ७९॥

दीर्घदर्शीप्राणतुल्या दीर्घदर्शीवरप्रदा ।
दीर्घदर्शीहर्षदात्रि दीर्घदर्शीप्रहर्षिता ॥ ८०॥

दीर्घदर्शीमहानन्दा दीर्घदर्शीगृहालया ।
दीर्घदर्शीगृहीतार्चा दीर्घदर्शीहृतार्हणा ॥ ८१॥

दया दानवती दात्री दयालुर्दीनवत्सला ।
दयार्द्रा च दयाशीला दयाढ्या च दयात्मिका ॥ ८२॥

दयाम्बुधिर्दयासारा दयासागरपारगा ।
दयासिन्धुर्दयाभारा दयावत्करुणाकरी ॥ ८३॥

दयावद्वत्सला देवी दयादानरता सदा ।
दयावद्भक्तिसुखिनी दयावत्परितोषिता ॥ ८४॥

दयावत्स्नेहनिरता दयावत्प्रतिपादिका ।
दयावत्त्राणकर्त्री च दयावन्मुक्तिदायिनी ॥ ८५॥

दयावद्भावसन्तुष्टा दयावत्परितोषिता ।
दयावत्तारणपरा दयावत् सिद्धिदायिनी ॥ ८६॥

दयावत्पुत्रवद्भावा दयावत्पुत्ररूपिणी ।

दयावद्देहनिलया दयाबन्धु दयाश्रया ॥ ८७॥

दयालुवात्सल्यकरी दयालुसिद्धिदायिनी ।
दयालुशरणासक्ता दयालुदेहमन्दिरा ॥ ८८॥

दयालुभक्तिभावस्था दयालुप्राणरूपिणी ।
दयालुसुखदादम्भा दयालुप्रेमवर्षिणी ॥ ८९॥

दयालुवशगा दीर्घा दीर्घाङ्गी दीर्घलोचना ।
दीर्घनेत्रा दीर्घचक्षु दीर्घबाहु लतात्मिका ॥ ९०॥

दीर्घकेशी दीर्घमुखी दीर्घघोणा च दारुणा ।
दारुणासुरहन्त्री च दारुणासुरदारिणी ॥ ९१॥

दारुणाहवकर्त्री च दारुणाहवहर्षिता ।
दारुणाहवहोमाढ्या दारुणाचलनाशिनी ॥ ९२॥

दारुणाचारनिरता दारुणोत्सवहर्षिता ।
दारुणोद्यतरूपा च दारुणारीनिवारिणी ॥ ९३॥

दारुणेक्षणसंयुक्ता दोश्चतुष्कविराजिता ।
दशदोष्का दशभुजा दशबाहुविराजिता ॥ ९४॥

दशास्त्रधारिणी देवी दशदिक्ख्यातविक्रमा ।
दशरथार्चितपदा दाशरथिप्रिया सदा ॥ ९५॥

दाशरथिप्रेमतुष्टा दाशरथिरतिप्रिया ।
दाशरथिप्रियकरी दाशरथिप्रियंवदा ॥ ९६॥

दाशरथीष्टसन्दात्री दाशरथीष्टदेवता ।
दाशरथिद्वेषिनाशा दाशरथ्यानुकूल्यदा ॥ ९७॥

दाशरथिप्रियतमा दाशरथिप्रपूजिता ।
दशाननारिसम्पूज्या दशाननारिदेवता ॥ ९८॥

दशाननारिप्रमदा दशाननारिजन्मभूः ।
दशाननारिरतिदा दशाननारिसेविता ॥ ९९॥

दशाननारिसुखदा दशाननारिवैरिहृत् ।
दशाननारीष्टदेवी दशग्रीवारिवन्दिता ॥ १००॥

दशग्रीवारिजननी दशग्रीवारिभाविनी ।
दशग्रीवारिसहिता दशग्रीवसभाजिता ॥ १०१॥

दशग्रीवारिरमणी दशग्रीववधूरपी ।

दशग्रीवनाशकर्त्री दशग्रीववरप्रदा ॥ १०२॥

दशग्रीवपुरस्था दशग्रीववधोत्सुका ।
दशग्रीवप्रीतिदात्री दशग्रीवविनाशिनी ॥ १०३॥

दशग्रीवहवकरी दशग्रीवानपायिनी ।
दशग्रीवप्रियावन्द्या दशग्रीवाहृता तथा ॥ १०४॥

दशग्रीवाहितकरी दशग्रीवेश्वरप्रिया ।
दशग्रीवेश्वरप्राणा दशग्रीववरप्रदा ॥ १०५॥

दशग्रीवेश्वररता दशवर्षीयकन्यका ।
दशवर्षीयबाला च दशवर्षीयवासिनी ॥ १०६॥

दशपापहरा दम्या दशहस्तविभूषिता ।
दशशस्त्रलसद्दोष्का दशदिक्पालवन्दिता ॥ १०७॥

दशावताररूपा च दशावताररूपिणी ।
दशविद्याभिन्नदेवी दशप्राणस्वरूपिणी ॥ १०८॥

दशविद्यास्वरूपा च दशविद्यामयी तथा ।
दृक्स्वरूपा दृक्प्रदात्री दृग्रूपा दृक्प्रकाशिनी ॥ १०९॥

दिगन्तरा दिगन्तरस्था दिगम्बरविलासिनी ।
दिगम्बरसमाजस्था दिगम्बरप्रपूजिता ॥ ११०॥

दिगम्बरसहचरी दिगम्बरकृतास्पदा ।
दिगम्बरहृताचित्ता दिगम्बरकथाप्रिया ॥ १११॥

दिगम्बरगुणरता दिगम्बरस्वरूपिणी ।
दिगम्बरशिरोधार्या दिगम्बरहृताश्रया ॥ ११२॥

दिगम्बरप्रेमरता दिगम्बररतातुरा ।
दिगम्बरीस्वरूपा च दिगम्बरीगणार्चिता ॥ ११३॥

दिगम्बरीगणप्राणा दिगम्बरीगणप्रिया ।
दिगम्बरीगणाराध्या दिगम्बरगणेश्वरी ॥ ११४॥

दिगम्बरगणस्पर्शा मदिरापानविह्वला ।
दिगम्बरीकोटिवृता दिगम्बरीगणावृता ॥ ११५॥

दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ।
दुरन्तदानवद्वेष्ट्री दुरन्तदनुजान्तकृत् ॥ ११६॥

दुरन्तपापहन्त्री च दस्त्रनिस्तारकारिणी ।

दस्रमानससंस्थाना दस्रज्ञानविवर्द्धिनी ॥ ११७॥

दस्रसम्भोगजननी दस्रसम्भोगदायिनी ।
दस्रसम्भोगभवना दस्रविद्याविधायिनी ॥ ११८॥

दस्रोद्वेगहरा दस्रजननी दस्रसुन्दरी ।
दस्रभक्तविधाज्ञाना दस्रद्विष्टविनाशिनी ॥ ११९॥

दस्रापकारदमनी दस्रसिद्धिविधायिनी ।
दस्रताराराधिता च दस्र मातृप्रपूजिता ॥ १२०॥

दस्रदैन्यहरा चैव दस्रतातनिषेविता ।
दस्रपितृशतज्योति दस्रकौशलदायिनी ॥ १२१॥

दशशीर्षारिसहिता दशशीर्षारिकामिनी ।
दशशीर्षपुरी देवी दशशीर्षसभाजिता ॥ १२२॥

दशशीर्षारिसुप्रीता दशशीर्षवधूप्रिया ।
दशशीर्षशिरश्छेत्री दशशीर्षनितम्बिनी ॥ १२३॥

दशशीर्षहरप्राणा दशशीर्षहरात्मिका ।
दशशीर्षहराराध्या दशशीर्षारिवन्दिता ॥ १२४॥

दशशीर्षारिसुखदा दशशीर्षकपालिनी ।
दशशीर्षज्ञानदात्री दशशीर्षारिदेहिता ॥ १२५॥

दशशीर्षवधोपात्त श्रीरामचन्द्ररूपता ।
दशशीर्षराष्ट्रदेवी दशशीर्षारिसारिणी ॥ १२६॥

दशशीर्षभ्रातृतुष्टा दशशीर्षवधूप्रिया ।
दशशीर्षवधूप्राणा दशशीर्षवधूरता ॥ १२७॥

दैत्यगुरुरतासाध्वी दैत्यगुरुप्रपूजिता ।
दैत्यगुरूपदेष्टी च दैत्यगुरुनिषेविता ॥ १२८॥

दैत्यगुरुगतप्राणा दैत्यगुर्तापनाशिनी ।
दुरन्तदुःखशमनि दुरन्तदमनीतमी ॥ १२९॥

दुरन्तशोकशमनी दुरन्तरोगनाशिनी ।
दुरन्तवैरिदमनी दुरन्तदैत्यनाशिनी ॥ १३०॥

दुरन्तकलुषघ्नी च दुष्कृतिस्तोमनाशिनी ।
दुराशया दुराधारा दुर्जया दुष्टकामिनी ॥ १३१॥

दर्शनीया च दृश्या च अदृश्याच दृष्टिगोचरा ।

दूतीयागप्रिया दूती दूतीयागकरप्रिया ॥ १३२॥

दूतीयागकरानन्दा दूतीयागसुखप्रदा ।
दूतीयागकरायाता दूतीयागप्रमोदिनी ॥ १३३॥

दुर्वासःपूजिता चैव दुर्वासोमुनिभाविता ।
दुर्वासोऽर्चितपादा च दुर्वासोमुनिभाविता ॥ १३४॥

दुर्वासोमुनिवन्द्या च दुर्वासोमुनिदेवता ।
दुर्वासोमुनिमाता च दुर्वासोमुनिसिद्धिदा ॥ १३५॥

दुर्वासोमुनिभावस्था दुर्वासोमुनिसेविता ।
दुर्वासोमुनिचित्तस्था दुर्वासोमुनिमण्डिता ॥ १३६॥

दुर्वासोमुनिसञ्चारा दुर्वासोहृदयङ्गमा ।
दुर्वासोहृदयाराध्या दुर्वासोहृत्सरोजगा ॥ १३७॥

दुर्वासस्तापसाराध्या दुर्वासस्तापसाश्रया ।
दुर्वासस्तापसरता दुर्वासस्तापसेश्वरी ॥ १३८॥

दुर्वासोमुनिकन्या च दुर्वासोत्भूतसिद्धिदा ।
दररात्री दरहरा दरयुक्ता दरापहा ॥ १३९॥

दरघ्नी दरहन्त्री च दरयुक्ता दराश्रया ॥ १४०॥

दरस्मेरा दरापाङ्गी दयादात्री दयाश्रमा ।
दस्रपूज्या दस्रमाता दस्रदेवी दुरोन्मदा ॥ १४१॥

दस्रसिद्धा दस्रसंस्था दस्रातापविमोचिनी ।
दस्रक्षोभहरा नित्या दस्रलोकगतात्मिका ॥ १४२॥

दैत्यगुर्वङ्गनावन्द्या दैत्यगुर्वङ्गनाप्रिया ।
दैत्यगुर्वङ्गनासिद्धा दैत्यगुर्वङ्गनोत्सुका ॥ १४३॥

दैत्यगुरुप्रियतमा दैत्यगुरुनिषेविता ।
देवगुरुप्रसूरूपा देवगुरुकृतार्हणा ॥ १४४॥

देवगुरुप्रेमयुता देवगुर्वनुमानिता ।
देवगुरुप्रभावज्ञा देवगुरुसुखप्रदा ॥ १४५॥

देवगुरुज्ञानदात्री देवगुरुप्रमोदिनी ।
दैत्यस्त्रीगणसम्पूज्या दैत्यस्त्रीगणप्रपूजिता ॥ १४६॥

दैत्यस्त्रीगणरूपा च दैत्यस्त्रीचित्तहारिणी ।
देवस्त्रीगणपूज्या च देवस्त्रीगणवन्दिता ॥ १४७॥

देवस्त्रीगणचित्तस्था देवस्त्रीगणभूषिता ।
देवस्त्रीगणसंसिद्धा देवस्त्रीगणतोषिता ॥ १४८॥

देवस्त्रीगणहस्तस्थ-चारुचामर-बीजिता ।
देवस्त्रीगणहस्तस्थ-चारुगन्ध-विलेपिता ॥ १४९॥

देवाङ्गनाधृतादर्श दृष्ट्यर्थमुखचन्द्रमा ।
देवाङ्गनोत्सृष्ट नागवल्लीदल कृतोत्सुका ॥ १५०॥

देवस्त्रीगणहस्तस्थ दीपमालाविलोकना ।
देवस्त्रीगणहस्तस्थ धूपघ्राण विनोदिनी ॥ १५१॥

देवनारीकरगत वासकासवपायिनी ।
देवनारीकङ्कतिका कृत्तकेश निमार्जना ॥ १५२॥

देवनारीरुष्यगात्रा देवनारि कृतोत्सुका ।
देवनारीविरचिता पुष्पमाला विराजिता ॥ १५३॥

देवनारीविचित्राङ्गी देवस्त्रीदत्तभोजना ।
देवस्त्रीगणगीता च देवस्त्रीगीतनोत्सुका ॥ १५४॥

देवस्त्रीनृत्यसुखिनी देवस्त्रीनृत्यप्रदर्शिनी ।
देवस्त्रीयोजितलसद्रत्नपादुपदाम्बुजा ॥ १५५॥

देवस्त्रीगणविस्तीर्ण चारुतल्पनिषेदुषी ।
देवनारीचारुकरा कलिताङ्घ्र्यादिदेहिका ॥ १५६॥

देवनारीकरव्यग्र-तालवृत्त-मरुत्सुखा ।
देवनारीवेणुवीणा-नादसोत्कण्ठमानसा ॥ १५७॥

देवकोटिस्तुतिनुता देवकोटिकृतार्हणा ।
देवकोटिगीतगुणा देवकोटिकृतस्तुतिः ॥ १५८॥

दन्तदृष्ट्योद्वेगफला देवकोलाहलाकुला ।
द्वेषरागपरित्यक्ता देवस्त्री द्वेषरागविवर्जिता ॥ १५९॥

दामपूज्या दामभूषा दामोदरविलासिनी ।
दामोदरप्रेमरता दामोदरभगिन्यपि ॥ १६०॥

दामोदर-प्रसूर्दामोदरपत्नी पतिव्रता ।
दामोदराभिन्नदेहा दामोदररतिप्रिया ॥ १६१॥

दामोदराभिन्नतनुर्दामोदरकृतास्पदा ।

दामोदरकृतप्राणा दामोदरगतात्मिका ॥ १६२॥

दामोदरकौतुकाढ्या दामोदरकलाकला ।
दामोदरालिङ्गिताङ्गी दामोदरकुतूहला ॥ १६३॥

दामोदरकृताह्लादा दामोदरसुचुम्बिता ।
दामोदरसुताकृष्टा दामोदरसुखप्रदा ॥ १६४॥

दामोदरसहाढ्या च दामोदरसहायिनी ।
दामोदरगुणज्ञा च दामोदरवरप्रदा ॥ १६५॥

दामोदरानुकूला च दामोदरनितम्बिनी ।
दामोदरजलक्रीडा-कुशलादर्शनप्रिया ॥ १६६॥

दामोदराबलक्रीडा-त्यक्तस्वजनसौहृदा ।
दामोदरलसद्रास केलीकौतुकिनी तथा ॥ १६७॥

दामोदरभ्रातृका च दामोदरपरायणा ।
दामोदरधरा दामोदरवैरि-विनाशिनी ॥ १६८॥

दामोदररोपजाया च दामोदरनिमन्त्रिता ।
दामोदरपराभूता दामोदरपराजिता ॥ १६९॥

दामोदरसमाक्रान्ता दामोदरहताशुभा ।
दामोदरोत्सवरता दामोदरोत्सवावहा ॥ १७०॥

दामोदरस्तन्यदात्री दामोदरगवेषिता ।
दमयन्ती-सिद्धिदात्री दमयन्तीप्रसाधिता ॥ १७१॥

दमयन्तीष्टदेवी च दमयन्तीस्वरूपिणी ।
दमयन्तीकृतार्चा च दमनर्षिविभाविता ॥ १७२॥

दमनर्षिप्राणतुल्या दमनर्षिस्वरूपिणी ।
दमनर्षिस्वरूपा च दम्भपूरितविग्रहा ॥ १७३॥

दम्भहन्त्री दम्भदात्री दम्भलोकविमोहिनी ।
दम्भशीला दम्भहरा दम्भवत्परिमर्दिनी ॥ १७४॥

दम्भरूपा दम्भकरी दम्भसन्तानदारिणी ।
दत्तमोक्षा दत्तघना दत्तरोग्याथ दाम्भिका ॥ १७५॥

दत्तपुत्रा दत्तदारा दत्तहारा च दारिका ।
दत्तभोगा दत्तशोका दत्तहस्त्यादिवाहना ॥ १७६॥

दत्तमति दत्तभार्या दत्तशास्त्रावबोधिका ।

दत्तपाना दत्तदाना दत्तदारिद्रनाशिनि ॥ १७७॥

दत्तसौधावनीवासा दत्तस्वर्गा च दासदा ।
दास्यतुष्टा दास्यहरा दासदासीशतप्रदा ॥ १७८॥

दाररूपा दारवासा दारवासिहृदास्पदा ।
दारवासिजनाराध्या दारवासिजनप्रिया ॥ १७९॥

दारवासि विनिर्नीता दारवासिसमर्चिता ।
दारवास्याहृतप्राणा दारवास्यारिनाशिनी ॥ १८०॥

दारवासिविघ्नहरा दारवासिविमुक्तिदा ।
दाराग्निरूपिणि दारा दारकार्य विनाशिनी ॥ १८१॥

दम्पती दम्पतीष्टा च दम्पतीप्राणरूपिका ।
दम्पतिस्नेहनिरता दाम्पत्यसाधनप्रिया ॥ १८२॥

दाम्पत्यसुखसेना च दाम्पत्यसुखदायिनी ।
दम्पत्याचारनिरता दम्पत्यामोदमोदिता ॥ १८३॥

दम्पत्यामोदसुखिनि दाम्पत्याह्लादकारिणी ।
दम्पतीष्टपादपद्मा दाम्पत्यप्रेमरूपिणी ॥ १८४॥

दाम्पत्यभोगभवना दाडिमीफलभोजिनी ।
दाडिमीफलसन्तुष्टा दाडिमीफलमानसा ॥ १८५॥

दाडिमीवृक्षसंस्थाना दाडिमीवृक्षवासिनी ।
दाडिमीवृक्षरूपाच दाडिमीवनवासिनी ॥ १८६॥

दाडिमीफलसाम्योरु पयोधरविवर्जिता ।
दक्षिणा दक्षिणारूपा दक्षिणारूपधारिणी ॥ १८७॥

दक्षकन्या दक्षपुत्री दक्षमाता च दक्षसूः ।
दक्षगोत्रा दक्षसुता दक्षयज्ञविनाशिनी ॥ १८८॥

दक्षयज्ञनाशकर्त्री दक्षयज्ञान्तकारिणी ।
दक्षप्रसूतिर्दक्षेज्या दक्षवंशैकपावनी ॥ १८९॥

दक्षात्मजा दक्षसूनुर्दक्षजा दक्षजातिका ।
दक्षजन्मा दक्षजनुर्दक्षदेहसमुद्भवा ॥ १९०॥

दक्षजनिर्दक्षयागध्वंसिनि दक्षकन्यका ।
दक्षिणाचारनिरता दक्षिणाचारतुष्टिदा ॥ १९१॥

दक्षिणाचारसंसिद्धा दक्षिणाचारभाविता ।

दक्षिणाचारसुखिनी दक्षिणाचारसाधिता ॥ १९२॥

दक्षिणाचारमोक्षाप्ति दक्षिणाचारवन्दिता ।
दक्षिणाचारशरणा दक्षिणाचारहर्षिता ॥ १९३॥

द्वारपालप्रिया द्वारवासिनी द्वारसंस्थिता ।
द्वाररूपा द्वारसंस्था द्वारदेशनिवासिनी ॥ १९४॥

द्वारकरी द्वारधात्री दोषमात्रविवर्जिता ।
दोषकरा दोषहरा दोषराशिविनाशिनी ॥ १९५॥

दोषाकरविभूषाढ्या दोषाकरकपालिनी ।
दोषाकरसहस्राभा दोशाकरसमानना ॥ १९६॥

दोषाकरमुखीदिव्या दोषाकरकराग्रजा ।
दोषाकरसमज्योति दोषाकरसुशीतला ॥ १९७॥

दोषाकरश्रेणी दोषसदृशापाङ्गवीक्षणा ।
दोषाकरेष्टदेवी च दोषाकरनिषेविता ॥ १९८॥

दोषाकरप्राणरूपा दोषाकरमरीचिका ।
दोषाकरोल्लसद्भाला दोशाकरसुहर्षिणी ॥ १९९॥

दोषाकरशिरोभूषा दोषाकरवधूप्रिया ।
दोषाकरवधूप्राणा दोषाकरवधूर्मता ॥ २००॥

दोषाकरवधूप्रीता दोषाकरवधूरपि ।
दोषापूज्या तथा दोषापूजिता दोषहारिणी ॥ २०१॥

दोषाजापमहानन्दा दोषाजापपरायणा ।
दोषापुरश्चाररता दोषापूजकपुत्रिणी ॥ २०२॥

दोषापूजक-वात्सल्यकारिणी जगदम्बिका ।
दोषापूजकवैरिघ्नि दोषापूजकविघ्नहृत् ॥ २०३॥

दोषापूजकसन्तुष्टा दोषापूजकमुक्तिदा ।
दमप्रसूनसम्पूज्या दमपुष्पप्रिया सदा ॥ २०४॥

दुर्योधनपूज्या च दुःशासनसमर्चिता ।
दण्डपाणिप्रिया दण्डपाणिमाता दयानिधिः ॥ २०५॥

दण्डपाणिसमाराध्या दण्डपाणिप्रपूजिता ।
दण्डपाणिगृहासक्ता दण्डपाणिप्रियंवदा ॥ २०६॥

दण्डपाणिप्रियतमा दण्डपाणिमनोहरा ।

दण्डपाणिहृतप्राणा दण्डपाणिसुसिद्धिदा ॥ २०७॥

दण्डपाणिपरामृष्टा दण्डपाणिप्रहर्षिता ।
दण्डपाणिविघ्नहरा दण्डपाणिशिरोधृता ॥ २०८॥

दण्डपाणिप्राप्तचर्चा दण्डपाण्युन्मुखी सदा ।
दण्डपाणिप्राप्तपदा दण्डपाणिवरोन्मुखी ॥ २०९॥

दण्डहस्ता दण्डपाणिर्दण्डबाहुर्दरान्तकृत् ।
दण्डदोष्का दण्डकरा दण्डचित्तकृतास्पदा ॥ २१०॥

दण्डविद्या दण्डिमाता दण्डिखण्डकनाशिनी ।
दण्डिप्रिया दण्डिपूज्या दण्डिसन्तोषदायिनी ॥ २११॥

दस्युपूज्या दस्युरता दस्युद्रविणदायिनी ।
दस्युवर्गकृतार्हा च दस्युवर्गविनाशिनी ॥ २१२॥

दस्युनिर्णाशिनि दस्युकुलनिर्णाशिनी तथा ।
दस्युप्रियकरी दस्युनृत्यदर्शनतत्परा ॥ २१३॥

दुष्टदण्डकरी दुष्टवर्गविद्राविणी तथा ।
दुष्टवर्गनिग्रहार्हा दूषकप्राणनाशिनी ॥ २१४॥

दुषकोत्तापजननी दूषकारिष्टकारिणी ।
दूषकद्वेषणकरी दाहिका दहनात्मिका ॥ २१५॥

दारकारी निहन्त्री च दारुकेश्वरपूजिता ।
दारुकेश्वरमाता च दारुकेश्वरवन्दिता ॥ २१६॥

दर्भहस्ता दर्भयूता दर्भकर्मविवर्जिता ।
दर्भमयि दर्भतनुर्दर्भसर्वस्वरूपिणी ॥ २१७॥

दर्भकर्माचाररता दर्भहस्तकृतार्हणा ।
दर्भानुकूला दार्भर्या दर्वीपात्रानुदामिनी ॥ २१८॥

दमघोषप्रपूज्या च दमघोषवरप्रदा ।
दमघोषसमाराध्या दावाग्निरूपिणी तथा ॥ २१९॥

दावाग्निरूपा दावाग्निनिर्णाशितमहाबला ।
दन्तदंष्ट्रासुरकला दन्तचर्चितहस्तिका ॥ २२०॥

दन्तदंष्ट्रस्यन्दना च दन्तनिर्णाशितासुरा ।
दधिपूज्या दधिप्रीता दधीचिवरदायिनी ॥ २२१॥

दधीचीष्टदेवता च दधीचिमोक्षदायिनी ।

दधीचिदैन्यहन्त्री च दधीचिदरदारिणी ॥ २२२॥

दधीचिभक्तिसुखिनि दधीचिमुनिसेविता ।
दधीचिज्ञानदात्रि च दधीचिगुणदायिनी ॥ २२३॥

दधीचिकुलसम्भूषा दधीचिभुक्तिमुक्तिदा ।
दधीचिकुलदेवी च दधीचिकुलदेवता ॥ २२४॥

दधीचिकुलगम्या च दधीचिकुलपूजिता ।
दधीचिसुखदात्री च दधीचिदीनहारिणी ॥ २२५॥

दधीचिदुःखहन्त्री च दधीचिकुलसुन्दरी ।
दधीचिकुलसम्भूता दधीचिकुलपालिनी ॥ २२६॥

दधीचिदानगम्या च दधीचिदानमानिनी ।
दधीचिदानसन्तुष्टा दधीचिदानदेवता ॥ २२७॥

दधीचिजयसम्प्रीता दधीचिजपमानसा ।
दधीचिजपपूजाढ्या दधीचिजपमालिका ॥ २२८॥

दधीचिजपसन्तुष्टा दधीचिजपतोषिणी ।
दधीचितापसाराध्या दधीचिशुभदायिनी ॥ २२९॥

दूर्वा दूर्वादलश्यामा दूर्वादलसमद्युतिः ।
नाम्नां सहस्रं दुर्गाया दादीनामिति कीर्तितम् ॥ २३०॥

यः पठेत् साधकाधीशः सर्वसिद्धिर्लभेत्तु सः ।
प्रातर्मध्याह्नकाले च सन्ध्यायां नियतः शुचिः ॥ २३१॥

तथाऽर्द्धरात्रसमये स महेश इवाऽपरः ।
शक्तियुक्तो महारात्रौ महावीरः प्रपूजयेत् ॥ २३२॥

महादेवीमकाराद्यैः पञ्चभिर्द्रव्यसत्तमैः ।
तत्पठेत् स्तुतिमिमां यः स च सिद्धिस्वरूपधृक् ॥ २३३॥

देवालये श्मशाने च गङ्गातीरे निजे गृहे ।
वाराङ्गनागृहे चैव श्रीगुरोः सन्निधावपि ॥ २३४॥

पर्वते प्रान्तरे घोरे स्तोत्रमेतत् सदा पठेत् ।
दुर्गानामसहस्रं हि दुर्गां पश्यति चक्षुषा ॥ २३५॥

शतावर्त्तनमेतस्य पुरश्चरणमुच्यते ।
स्तुतिसारो निगदितः किं भूयः श्रोतुमिच्छसिः ॥ २३६॥

॥ इति श्रीकुलार्णवे दकारादि दुर्गासहस्रनामस्तोत्रं सम्पूर्णम् ॥

Encoded by Kirk Wortman kirkwort@hotmail.com
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. durgA dakArAdi sahasranAma stotram ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*